श्रीसद्गुरुचरणारविंदाभ्यां नमः श्रीशारदा जयति सत्यं मायैमयायमाबधो
मयाबधेन बुधित ःअंजलिः सह मायावी मयातुष्यतु माधव ः॥ १॥ सर्वमिदं अनु
मानप्रामाण्यव्यवस्थापकयुक्तिमदर्शनं व्याप्तिनिश्चये सतीत्यन्वयः स एव व्या
प्तिनिश्चय एव न संभवति नोत्पन्नुमर्हति उपायाभावात् निश्चायकाभावात् अ
नुमानप्रामाण्योपपादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वा
त् वक्ष्यत इत्यनेन तत्प्रतीक्षां विधाय व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशंकां
परिजिहीर्षुः तत्रार्थंम्येतस्य व्याप्तिग्रहोपायप्रतिपादनोपइकत्वरूपं बीजम्
दर्शयन्नन्वित्यादिग्रंथमवतारयति समारब्धो इति व्याप्तिग्रहोपायाकथनेन प्रामा
ण्यव्यवस्थापनस्यानिष्पन्नत्वात् समारब्धेति परीक्षाविशेषणं परीक्षा परमत
निराकरणपूर्वक स्वमतव्यवस्थापनं कारणीकृतेति प्रतिपादनविशेषणं य
द्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्वलाभेनैव

१ कथनंतस्यावश्यकत्वप्रदर्शनायव्याप्तिग्रहोपायश्चवक्ष्यतइत्येतद्ग्रंथावतारणा पं०
गदा व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकत्वलाभेनैवतल्लाभात्‌तथापिप्रा
माण्यव्यवस्थापननिर्वाहकतयाभवतुव्याप्तिग्रहोपायस्येदानीमाकांक्षितत्वं
त्वमपितद्व्याप्तिस्वरूपनिरूपणंविनानसंभवतीतिप्रथमतस्तद्वोचित
मित्येतत्सूचनायतदपिहितंनिदानमितिव्याप्तिघटकीभूताव्यभिचारांश
मानेबाधाभावमुद्रयाव्यभिचारज्ञानाभावोहेतुःसाध्यसमानाधिकरणवृ
त्तिहेतुतावच्छेदकांशग्रहेचविशेषणज्ञानसद्रयासहचारग्रहोहेतुरितिक्रमे
णव्याप्तिग्रहोपायप्रतिपादनस्यव्याप्तिस्वरूपमप्रतिपाद्यशक्यत्वात्‌तदिति
भावःप्रथमतःपूर्वपक्षस्यैवाभिधानेननिरूपयतीत्यसंगतमतआरभतइ राम
त्युक्तंनिरूपणस्यपरमतनिराकरणपूर्वकसिद्धांतकथनरूपतयापूर्वप १
क्षाभिधानतत्खंडनयोरपितदारंभतेति ध्येयंमूलेनतावद्व्यभिचारितत्व

मितिव्याप्तिरितिप्रश्नस्यमनुपपद्यतेतथाचाव्यभिचारपदार्थेनानुमितिजनकज्ञानविषयवृत्य
ति र्थः अनुमितिजनकत्वंनाव्यभिचारपदार्थोराच्छिंन्नहेतुविषयताघटितधर्मावच्छिंन्नमितितुपर्य
वसितंअत्रहेतुमाहन -- तिह्ययं ; साध्याभाववद्वृत्तित्वरूपंतद्व्यभिचारितत्वंनव्याप्तिरित्यनु
षंगेणान्वयः तथाचसाध्याभाववद्वृत्तित्वादिरूपायेऽव्यभिचारपदार्थाः पंचतत्तद्वच्छिंन्नहेतु
विषयताघटितधर्मावच्छिंन्नत्वाभावकूटवत्वादितिनिरुक्तपर्यवसितसामान्याभावसाधकः
फलितोहेतुः नेत्र -------- कत्वंविशेषाभावकूटस्यसामान्याभावसाधकतायामविवादात् तत्र
साध्याभाववद्वृत्तित्वादिरूपायेपंचाव्यभिचारपदार्थाः तत्तद्वच्छिंन्नविषयताघटितधर्मावच्छिं
न्नत्वाभावकूटस्यप्रत्येकसाधकहेतुंवक्ष्यतिकेवलान्वयिन्यभावादितिसाध्येऽत्यंताभावाप्रति
योगित्वान्योन्याभावप्रतियोगितानवच्छेदकत्वग्रहदशायांअत्यंतान्योन्याभावयोः साध्यतद्व
त्वावच्छिंन्नप्रतियोगिताकत्वमानसंभवेनप्रतियोगितयासाध्यतद्वदाश्रयविशेषितात्यंतान्यो
न्याभाववद्वृत्तित्वत्वावच्छिंन्नविषयतायास्तादृशविशेषदर्शिनामनुमितिजनकज्ञानेऽभा

२ वादित्यर्थः एवंच तादृशविषयताशून्यत्वमितित्वमेवानुमितिजनकतायां दर्शितसाध्यसाधको हेतुर ५
गदा· भिमत इति नासिद्ध्यादिः ईदृशादिशाऽग्रिमहेतावपि परिष्करणीयाः दीधितौ अव्याप्येति कपिसंयो
ग्येतद्वृक्षत्वादित्यादावित्यर्थः अव्याप्तिमिति तत्र हेत्वधिकरणे एतद्वृक्षादावन्यदेशकालावच्छेदे
न कपिसंयोगाद्यभावसत्वादिति भावः साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारये भेदसं
बंधेन साध्यवद्भिन्नीयं यत्तद्वृत्तित्वस्यैव लक्षणत्वसंभवात्साध्याभावांशस्यैव वैयर्थ्यापत्ति
रतस्सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्न इति तथाच साध्यवद्भिन्नवृत्तिर्यस्साध्याभाव॰
तद्वद्वृत्तित्वमित्यर्थः तत्र पूर्ववद्भेदेन साध्यवद्भिन्नपदार्थविशेषितधर्मिवृत्तित्वादेर्न घटक
तानादृशपदार्थस्य धर्मिण्यविशेषणत्वात् वृत्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशा राम
दिति न साध्याभावांशवैयर्थ्यमिति भावः अभाववत्साध्यीयत्वानिवेशे कुत्रादिवृत्तिगग २
नाद्यभाववति पर्वतादौ धूमादेर्वृत्तेरसंभव इति तद्वारणाय साध्यपदसार्थक्यं न वाधिकरण

तेनसंबंधेनाभाववत्त्वंनिवेश्यंसंयोगेनवन्ह्यादौसाध्येतादृशसंबंधोदैशिकविशेषणता
कालिकविशेषणतासंबंधेनाकाशाभावाभावेदैशिकविशेषणतयासाध्येकालिकसंबं
धएवतथासमवायादिनाघटत्वादेरभावेदैशिकविशेषणतयासाध्येसमवायादिरेवेति
नदोषःनचैवंवृक्षनिष्ठायाकपिसंयोगाभावीयमूलावच्छिंनविशेषणतातादृशसंबंधे
नवृक्षादौतादृशज्ञानेपिकपिसंयोगवत्ताज्ञानोत्पत्तेस्तादृशसंबंधोनलक्षणघटकइति
साध्यवद्भिंन्नवृत्तित्वमभावविशेषणःभावकत्वायर्थमितिवाच्यंसंयोगतदभावयोरविरु
द्धत्वज्ञानाभावदशायांवृक्षःकपिसंयोगाभाववानितिज्ञानस्यापिवृक्षेकपिसंयोगव
त्ताज्ञानविरोधितयावृक्षनिष्ठतदभावीयविशेषणतायाअपिसाध्यवत्ताज्ञानप्रतिबं
धकतावच्छेदकीभूतसंसर्गताश्रयत्वात्केचित्तुसाध्यात्मकस्वाभावनिरूपितप्रतियो
गितावच्छेदकसंबेनसाध्याभाववत्त्वंविवक्षितंसचसंबंधोयत्संबंधावच्छिंन्नप्रतियोगि

नाकः स्वाभावः साध्यमितितेनोक्ताऽनुपपत्तिः अथसमवायेनप्रमेयत्वावच्छिन्नसा ५
ध्यकद्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतुकस्थलेकालिकसंबंधस्यापितत्संबंधाव
च्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात्तेन
साध्याभाववतिकालेहेतोर्वृत्तेरव्याप्तिः नचसाध्यनिरूपितस्वनिष्ठप्रतियोगिताव
च्छेदकसंबंधनिवेशान्नायंदोषः कालिकसंबंधावच्छिन्नघटाभावादिरूपप्रमेय
स्यकालिकसंबंधावच्छिन्नप्रतियोगितायाः घटादावेवसत्त्वात्कालिकसंबंधस्यसम
मवायसंबंधावच्छिन्नप्रमेयाभावात्मकस्वनिष्ठप्रतियोगितावच्छेदकसंबंधत्वविरहा
दितिवाच्यम् तादृशप्रमेयाभावस्यकालिकसंबंधावच्छिन्नप्रतियोगिताकोयोभावस्त
स्यापिप्रमेयत्वेनसाध्यतयातन्निरूपिततादृशप्रमेयाभावनिष्ठप्रतियोगितावच्छे
दकत्वस्यकालिकसंबंधेप्यक्षततयाऽव्याप्तेर्दुर्वारत्वात् नचयावत्साध्यनिरूपितप्रति

योगितानिवेशनीयात्तथा चोपदर्शिताऽभावात्मकयत्किंचित्प्रमेयनिरूपितस्वनिष्ठप्रतियो
गितावच्छेदककालिकसंबंधमादायनदोषइतिवाच्यम् असमवेतप्रमेयस्यसमवायसंबंधा
वच्छिन्नप्रमेयाभावोऽत्रनास्तीतिप्रत्ययाविषयतयातादृशप्रमेयाभावाभावत्वेमानाभावा
त् तादृशप्रमेयाभाववनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिध्या उक्तस्थलेऽव्याप्तिता
दवस्थ्यात् नचसाध्यतावच्छेदकसंबंधेनवृत्तिमधावत्साध्यनिरूपितप्रतियोगितायानि
वेशनीयतयानोक्ताप्रसिध्धिरितिवाच्यम् सर्वत्रसमवायिन्येकयासत्तयैवतादृशप्रमेयाभा
वाभाववत्तानिर्वाहेसर्वसमवाय्यसंग्राहकगुणादीनांतादृशप्रमेयाभावाभावत्वेमानाभा
वेनर्शिदिंताप्रसिध्धेर्दुर्वारत्वादितिचेन्न साध्यतावच्छेदकसंबंधेनवृत्तिमद्यत्किंचित्साध्यनि
रूपितस्वनिष्ठप्रतियोगितावच्छेदकसंबंधनिवेशेनैवोपपत्तेः कालिकसंबंधावच्छिन्नप्र
तियोगिताकस्यदर्शितसाध्याभावाभावस्यसाध्यत्वेपितस्यसाध्यतावच्छेदकसमवा
यसंबंधेनावृत्तित्वात् नचैवमपिकालिकसंबंधेनप्रमेयसाध्यककालत्वादिहेतावव्याप्तिः

ग० ध० कालिकसंबंधावच्छिंन्नप्रतियोगिताकप्रमेयाभावस्य यः कालिकसंबंधावच्छिंन्नाभावः तस्य प० ल०
५ स्वाभावात्मकस्य प्रमेयत्वेन साध्यतास्य प्रतियोगितावच्छेदकीभूतकालिकसंबंधेन कालिक
संबंधावच्छिंन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम् तादृशप्रतियोगितावच्छेदकयत्सं
बंधेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्संबंधेन तद्वत्त्वावृत्तित्वस्य विवक्षणीयत्वादुक्तस्थले
च साध्याभावस्य कालिकसंबंधेन साध्यवद्भिन्ने वृत्तेः अथैवं तादृशप्रतियोगितायां स्व
निष्ठत्वनिवेशो विफलः इत्थं निवेशेपि घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्य
निरूपितप्रतियोगितावच्छेदकतादात्म्यसंबंधेन घटत्वात्मकसाध्याभाववति घटत्वे
घटत्वाभावरूपहेतोर्वृत्तेरव्याप्तिप्रसक्तावपि तादृशयाऽपीदृशविवक्षया वारणसंभवा
त् घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसंबंधेन साध्य राम
वद्भिन्ने घटे वृत्तेः न चैवं तादृशसाध्यस्य तादृशसंबंधेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध ५
इति कथमव्याप्तिपरिहार इति वाच्यम् घटभेदस्य घटत्वाभावसमनियतत्वेन तद्भिन्न

तयाघटत्वेपिसमवायसंबंधावच्छिन्नायाः तादृशप्रतियोगितायाः सत्वेनतादृशप्रति
योगितावच्छेदकसमवायेनसाध्यवद्भिन्नवृत्तिघटत्वरूपसाध्याभावस्याप्रसिद्धिसंभ
वात् तादृशाभावयोर्भेदे स्वनिष्ठत्वस्यप्रतियोगिताविशेषणत्वेपिघटत्वरूपसाध्या
भावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्यानदोषतादवस्थ्यात् संयोगिभेदस्य
५ याप्याव्यावृत्तित्वरूपवैधर्म्येणसंयोगाभावाभेदासंभवेपिसंयोगवत्वप्रकारकप्र
माविषयत्वाभावाभेदे बाधकाभावात् स्वरूपसंबंधस्यापिसाध्यनिरूपितप्रतियोगि
तावच्छेदकसंबंधतयातेनसंबंधेनसाध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्या
भावस्याप्रसिद्ध्यासंयोगिभिन्नंगुणत्वादित्याद्यव्याप्तेरनवकाशादितिचेन्न प्रति
योगितायांस्वनिष्ठत्वानिवेशेकालिकसंबंधावच्छिन्न प्रतियोगिताकआकाशाभा
वाभावादौसाध्येआत्मत्वाद्यव्याप्तेर्दुर्वारत्वात् तादृशसाध्यस्ययत्कालिकसं
बंधावच्छिन्नाभावोदैशिकविशेषणतासंबंधावच्छिन्नतदभावस्यतादृशसाध्य

ग० ध० स्वरूपतयादैशिकविशेषणतासंबंधस्यसाध्यनिरूपितप्रतियोगितावच्छेदकसंबं प० ल०
६ धत्वात्तेनसंबंधेनाकाशाभावरूपसाध्याभावस्यसाध्यवद्भिन्नेकालेहेतुमतिच
वृत्तेः प्रतियोगितायांस्वनिष्ठत्वनिवेशेदैशिकविशेषणतयाकाशाभावनिष्ठसाध्यनि
रूपितप्रतियोगितावच्छेदकसंबंधत्वविरहेणाव्याप्त्यनवकाशात्नचसाध्यनिरूपि
तस्वनिष्ठप्रतियोगितानिवेशेसाध्याभावपदोपादानवैयर्थ्यंअभावांतरनिष्ठप्रति
योगितायाः स्वनिष्ठत्वविरहेणैवतद्व्यावृत्तेरितिवाच्यंस्वपदार्थस्याद्वित्वानिवेशेनसा
ध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसंबंधेनसाध्याभाववत्वनिवेशाद्वौपे
णतत्पदवैयर्थ्यानवकाशात्तादृशसंबंधेनसाध्यवद्भिन्नवृत्तित्वमात्रनिवेशेसाध्य राम
वद्भिन्नवृत्त्यभावांतरवतिहेतौवृत्त्याऽनुपपत्तेरित्याहुः अत्रेदंबोध्यंसाध्यवत्वग्रहवि ६
रोधिग्रहविषयसंबंधेनसाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधेनवानानुमि
त्यौपैकव्याप्तिशरीरेअभाववत्वनिवेशसंभवः साध्यभेदेनव्याप्तेर्भेदात्लाघवेनतत्त

त्साध्यकस्थले तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गा
णामेववृत्तितयानिवेशौचित्यात् उक्तरूपेणविशेषणताविशेषादीनांसंबंधतायाः अत्यं
ताप्रामाणिकतया तद्रूपावच्छिन्नस्य संबंधविधया व्याप्तिघटकत्वायोगाच्च परंतु यादृश
साध्यकस्थले यादृशसंबंधो वसंबंधतया व्याप्तिघटकस्तत्परिचयार्थैवदृशिनोक्तयः
तथाच यादृशसंबंधेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्त्तते तादृशसंबंधेन त
द्वत्वं निवेश्यमित्युक्ते एव तत्परिचयसंभवादित्यलं वाग्जालेन साध्याभाववत्पदेन साध्या
भाववत्त्वविशिष्टाधिकरणं विवक्षणीयं तेन गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वादि
त्यादौ विशिष्टस्यानतिरिक्ततया साध्याभावस्य गुणादौ सत्त्वेपि न क्षतिः गुणे गुणान्यत्व
विशिष्टसत्ताभावो नास्तीत्यप्रत्ययात् तत्र तादृशाभाववत्त्वविशिष्टाधिकरणत्वानभ्युपग
मात् अथैतल्लक्षणे घटत्वघटाकाशसंयोगान्यतराभाववानाकाशत्वादित्यादावव्याप्तिः
को

ग० ध० धटत्वस्याव्याप्यवृत्तितयातद्घटितान्यतराभाववद्भिन्नेघटेवर्त्तमानस्यघटाकाशसंयो प० ल०
७ गात्मकसाध्याभावस्यहेत्वधिकरणेगगनेपिवृत्तेःनिरवच्छिन्नसाध्याभाववृत्तानि
वेशेवसाध्यवद्भिन्नवृत्तित्वानिवेशस्यैववैयर्थ्यादितिचेन्नएतल्लक्षणकर्तृमतेप्रतियो
गित्वासामानाधिकरण्यप्रतियोगिवैय्याधिकरण्यरूपविरुद्धधर्माध्यासोऽभावस्य
भेदकइत्येतादृशयुक्त्याद्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धि
रित्यनुसृत्याव्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिस्समाधीयतेतथाचघटाकाशसं
योगस्योक्तान्यतराभावप्रतियोगित्वेपिनतदभावरूपतातथासतितादृश।
विरुद्धधर्मयोस्समावेशापत्तेःतयोर्विरोधाभावेसंयोगाभावस्याप्यधिकरण
भेदेनभेदासिद्धेरव्याप्यवृत्तिसाध्यकेसर्वत्रैवाव्याप्तिस्तदभिप्रायेणलक्षणां राम
तरस्यादरणीयत्वादितिगगनेऽतिरिक्तएवतदभावःस्वीकरणीयःसचनसा ७

ध्यवच्छिन्नवृत्तिरितिनदोषः साध्यवच्छिन्नेवर्त्तत इत्यनेनानवच्छिन्नवृत्तिकत्वरू
पपर्यवसितार्थतात्पर्यात् घटाकाशसंयोगात्मकमभावमादायनदोषइतितुनश्र
द्धेयंभूतथासतिसुषुप्त्यादिकालावच्छेदेनास्मदाद्यात्मवृत्तौस्वाश्रयघटितसंबंधा
वच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावेसाध्येसुखादौ अव्याप्तिस्तत्रसाध्यव
च्छिन्नेईश्वरेतादृशसंबंधेननिरवच्छिन्नवृत्तिकस्यज्ञानत्वादिरूपाभावस्यतेन न्य५लो५
संबंधेनसुखाद्यधिकरणेअस्मदाद्यात्मन्यपिरक्षेः उत्पत्तिकाँवच्छिन्नघ
टादिवृत्तितादृशसंबंधावच्छिन्नप्रतियोगिताकसमाभावादिसाध्यकघट
त्वादिहेतावव्याप्तिश्चसंयोगाभावनिष्ठयोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रति
योगिसामानाधिकरण्यप्रतियोगिवैयधिकरण्ययोर्वक्ष्यमाणरीत्यानविरो
धइत्यव्याप्यवृत्तिसाध्यकस्थले ऽव्याप्त्यालक्षणांतरमवतारयतिकर्मादाविति॥

ग॰ध॰ इदंत्ववधेयंद्रव्यवृत्तिसंयोगाभावो गुणादौनस्वीक्रियते अपितुकॢप्ततद्वृत्तिसंयोग प॰ल॰
८ वत्त्वप्रकारकप्रमाविषयत्वाभावएवसंयोगाभाववत्त्वंकल्प्यते अनंतगुणाद्यात्म
काधिकरणेषुयोगाभावकल्पनामपेक्ष्यतथाविधैकाभावेसंयोगाभाववत्त्वकल्प
नेलाघवात् नचसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावेद्रव्यभेदसंयोगिभेदादौ
वासंयोगाभाववत्त्वंकल्प्यतइत्यत्रविनिगमकाभावइतिवाच्यम् तादृशाभावानांसम
नियतत्वतयाऽभेदात् एवंचद्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदः सप्र
माणएव अथैवंद्रव्यत्वाभावादीनामप्यानंत्यापत्तिः कर्मादौगुणवृत्तिद्रव्यत्वाभावोनक
ल्प्यते अपितुकॢप्ततद्वृत्तिद्रव्यगुणान्यतरत्वाभावएवतदभाववत्त्वमित्यादितर्कगवेषण राम
याकर्मादिवृत्तिद्रव्यत्वाभावस्यगुणादिवृत्तितदभावभेदसिद्धिरितिचेत् इष्टमेवैतत् अधि ८
करणभेदेनाभावभेदवादिनानवैवंसंयोगाभावत्वकल्पनायांधर्मिणामप्यानंत्यादुक्त

विनिगमकाभावइतिवाच्यम् विनिगमनाविरहेणापिद्रव्यत्वाभावेसंयोगाभावत्व
कल्पनायानिष्प्रत्यूहत्वादितिहेतोरितिनानाधिकरणकस्येत्यादिः अथाहेरि
तिएतद्रूपवानेतद्रसादित्यादौएतद्रसाधिकरणेएतद्रूपाधिकरणस्यहित्वा
दिनाभेदसत्वेपि यासद्व्यवृत्तिधर्मानवच्छिन्नत्वेनसाध्यवन्निष्ठप्रतियोगि
तायाः प्रतियोग्यवृत्तित्वेनवाभेदस्यविशेषितत्वेनलक्षणगमनसंभवात्
नासंभवोदर्शितः साकल्यमितिबोध्यमित्यस्यविशेषणमित्यादिः अत्रसाध्याभा
ववतिसाकल्यविशेषणसत्वएवसाध्येतद्विशेषणयोरितिः संगच्छते अन्यथासा
ध्याभाववत्तायाहेतुमत्साधारण्येपिसाध्याभाववद्व्यक्तिं चिद्व्यक्तिनिष्ठाभावप्रति
योगित्वमादायनानाव्यक्तिसाध्यकसद्धेतौलक्षणसमन्वयसंभवादतः साध्यत
द्भाववतिचेत्यनुक्त्वासाध्याभाववतिसाकल्यविशेषणंप्रथमतोदर्शितंनचसाध्या

ग॰ध॰ भाववतिसाकल्यविशेषणासत्वेपिवन्हिमान्पर्वतान्यत्वादित्यादावतिव्याप्तिवार प॰ल॰
९ णमेवसाध्येसाकल्यविशेषणप्रयोजनमस्तिउभयत्रसाकल्यविशेषणादानेय
त्किंचित्साध्याभाववतिपर्वतेहेत्वभावसत्वेनातिव्याप्तेः साध्येसाकल्यविशेष
णसत्वेतुक्तदोषैरेवसकलसाध्याभाववत्तयातत्रहेतुसत्वेनातिव्याप्त्युद्धारादिति
नोक्ताभिप्रायोपवर्णनंसंम्यगितिवाच्यंमूसाध्याभाववतिसाकल्यविशेषणासत्वे
पिसाध्येसाकल्यविशेषणस्योक्तातिव्याप्तिवारणप्रयोजनकत्वसंभवेपिवक्ष्य
माणप्रयोजनस्यैवतयातस्यसाध्याभाववतिसाकल्यविशेषणसत्वएवसंगतेरा
दैतत्प्रदर्शनस्योचितत्वात् वस्तुतस्तुसाध्येसाकल्यक्विविशेषणंपरित्यज्यसा राम
ध्याभावेसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशरूपकल्पांतरस्या ९
वलंबनीयत्वयाचरममेवतत्प्रदर्शनमुचितं॰ साध्येतदभाववतिचबोध्यमित्यु

क्तासाध्यतावच्छेदकावच्छिन्नाः प्रतियोगिताकोभावोग्राह्यइत्युक्तेः। साध्याभाव
वतिसाकल्यंनिवेश्यतेसाध्याभावोवाएतादृशोनिवेश्यइत्येतादृशाविकल्पःप्रती
यतेसचाविवक्षितइतिसारंअव्याप्तिवारणायसाध्याभावेसाकल्यविशेषणेधू
मवान्वन्हेरित्यादौसाध्यतावच्छेदकीभूतसंयोगसंबंधावच्छिंन्नप्रतियोगिता
कसकलसाध्याभावाधिकरणंगुणादिरेवस्यात् अयोगोलकादेर्हृदासंयुक्तत्वा
वच्छिंन्नाभावानधिकरणत्वादित्यतिव्याप्तिः वंन्हिमत्वप्रकारकप्रमाविषयोधूमा
दित्यादौसाध्यतावच्छेदकीभूतस्वरूपसंबंधावच्छिंन्नप्रतियोगिताकतत्तद्विप
क्षावृत्तित्वावच्छिंन्नाभावस्यतत्तद्विपक्षमात्रवृत्तितयासकलसाध्याभावा
धिकरणाप्रसिध्याऽव्याप्तिश्चेतितदुपेक्षयसाध्येसाकल्यविशेषणंनिवेशि
तंननुसाध्येसाकल्यविशेषणदानेपिवंन्हिमान्धूमादित्यादावव्याप्तितादवस्थ्यं

ग० ध० पर्वतादावपिपर्वतीयवन्हेर्द्दित्वादिर्नाभावसत्वेनसकलसाध्याभावसत्वाद्व्यास प० ल०
१० ज्यवृत्तिधर्मानवच्छिंन्नप्रतियोगिताकत्वेनाभावविशेषणेचवन्हिधूमोभयवा
न्वन्हेरित्यादावतिव्याप्तिः वन्हितस्तथाविधसाध्याभावानधिकरणत्वात् सा
ध्यतावच्छेदकातिरिक्तोयोव्यासज्यवृत्तिधर्मस्तदनवच्छिंन्नप्रतियोगिताकत्व
निवेशनेचलाघवात्साध्यतावच्छेदकावच्छिंन्नप्रतियोगिताकत्वस्यैवाभावेनि
वेशनमुचितंकिंसाध्येसाकल्यविशेषणेनेत्यभिप्रेत्यतथैवाहसाध्यतावच्छेद
केतिसाध्याभाववतिसाकल्यविशेषणप्रयोजनमाहविलक्षणेतिवैकल्पिक राम
योस्साध्यतदभावयोस्साकल्यसाध्यतावच्छेदकावच्छिंन्नप्रतियोगिताकत्व १०
योव्याप्तिमाहनवेतिएकव्यक्तिकेएतद्रूपवानेतद्रसादित्यादौहेत्वधिकरणेपूर्व

क्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकर
णः पूर्वक्षणादिवृत्तित्वविशिष्टे तद्रूपादेरेतद्रसाधिकरणेऽवृत्तेरेतद्रूपतद्रूपोभयत्वाव
च्छिन्नाभावोऽपि न तथा प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः तत्र ल
क्षणसंगतिरतो नानाव्यक्तिकेत्युक्तं अत एवाव्याप्तिरेवोक्ता नासंभवः अ-त्र नानाव्य
क्तिसाध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदकत्वं अत एवैतद्वृत्तित्वावधर्मा
एतत्त्वादित्यादौ नानाव्यक्तिसाध्यके अव्याप्तिविरहेऽपि न क्षतिः अव्याप्यवृत्तीति
कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः अव्याप्तिवारणायेत्यन्वयः व्यभिचारिणि
चेति एतद्वृक्षत्ववान्कपिसंयोगीत्यादावित्यर्थः अभावद्वये साध्याभावे हेत्वभा
वे च तथा चाव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेर्वारणाय साध्याभावे व्य
भिचारिणि चाव्याप्यवृत्तावतिव्याप्तेर्वारणाय हेत्वभावे प्रतियोगिवैयधिकरण्य

ग०ध० मित्यर्थः यद्यपिहेत्वभावेप्रतियोगिवैयधिकरण्यविशेषणस्यावश्यकतयाकपि प०ल०
संयोगिकपिविभागादित्यादौअव्याप्यवृत्तिहेतुकेऽव्याप्तिवारणप्रयोजनकत्वंसा
११ ध्याभावेतद्विशेषणस्यसंभवतीतिव्याप्यवृत्तीत्यकिंचित्करंतथापिहेत्वभावेतद्वि
शेषणप्रतिसंधानंविनैवव्याप्यवृत्तिहेतुकस्थलेऽव्याप्तिनिर्णयोभवतीत्येतदभि
संधायैवतदुक्तंप्रतियोगिवैयधिकरण्यंनप्रतियोग्यधिकरणावृत्तित्वं० अव्या
प्यवृत्तिसाध्यकेतथाविधहेतुकेचतादृशसाध्याभावहेत्वभावाप्रसिध्याऽव्याप्तेः
अपितुप्रतियोग्यनधिकरणवृत्तित्वंतथाचप्रतियोग्यनधिकरणवृत्तित्वविशि
ष्टसाध्याभावाधिकरणेषुयावत्सुप्रतियोग्यनधिकरणवृत्तित्वविशिष्टसन्वर्त्त राम
तेयोभावःतत्प्रतियोगित्वमित्यर्थः कपिसंयोगीएतद्वृक्षत्वादित्यादौकपि ११
संयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितस्यकपिसंयोगाद्यभावस्य०